# Shiva Nirvana Stotram

# शिवनिर्वाणस्तोत्रम्

## Document Information

Text title : shivanirvANastotram

File name : shivanirvANastotram.itx

Category : shiva, aShTottarashatanAmAvalI

Location : doc_shiva

Transliterated by : Ganesh Kandu kanduganesh at gmail.com

Proofread by : Ganesh Kandu kanduganesh at gmail.com, NA

Latest update : July 20, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 20, 2023

*sanskritdocuments.org*

Shiva Nirvana Stotram

# शिवनिर्वाणस्तोत्रम्

ॐ नमः शिवाय ।

ॐ जयत्यनन्यसामान्यप्रकृष्टगुणवैभवः ।
संसारनाटकारम्भनिर्वाहणकविः शिवः ॥ १॥

ॐ नमः शिवाय भूतभव्यभाविभावभाविने ।
ॐ नमः शिवाय मातृमानमेयकल्पनाजुषे ।
ॐ नमः शिवाय भीमकान्तशान्तशक्तिशालिने ।
ॐ नमः शिवाय शाश्वताय शङ्कराय शम्भवे ।
ॐ नमः शिवाय निर्निकेतनिःस्वभावमूर्तये ।
ॐ नमः शिवाय निर्विकल्पनिष्प्रपञ्चसिद्धये ।
ॐ नमः शिवाय निर्विवादनिष्प्रमाणसिद्धये ।
ॐ नमः शिवाय निर्मलाय निष्कलाय वेधसे ।
ॐ नमः शिवाय पार्थिवाय गन्धमात्रसंविदे ।
ॐ नमः शिवाय षड्रसादिसामरस्यतृप्तये । १०
ॐ नमः शिवाय तैजसाय रूपतानिरूपिणे ।
ॐ नमः शिवाय पावनाय सर्वभावसंस्पृशे ।
ॐ नमः शिवाय नाभसाय शब्दमात्ररविणे ।
ॐ नमः शिवाय निर्गलन्मलव्यपायपायवे ।
ॐ नमः शिवाय विश्वसृष्टिसौष्टवैकमीढुषे ।
ॐ नमः शिवाय सर्वतः प्रसारिपादसम्पदे ।
ॐ नमः शिवाय विश्वभोग्यभागयोग्यपाणये ।
ॐ नमः शिवाय वाचकप्रपञ्चवाच्यवाचिने ।
ॐ नमः शिवाय नस्यगन्धसर्वगन्धबन्धवे ।
ॐ नमः शिवाय पुद्गलालिलोलिकाप्रशालिने । २०
ॐ नमः शिवाय चाक्षुषाय विश्वरूपसन्दृशे ।
ॐ नमः शिवाय सद्गुणत्रयाविभागभूमये ।

ॐ नमः शिवाय पूरुषाय भोक्तृताभिमानिने ।
ॐ नमः शिवाय सर्वतो नियन्तृतानियामिने ।
ॐ नमः शिवाय कालभेदकल्पनोपकल्पिने ।
ॐ नमः शिवाय किञ्चिदेवकर्तृतोपपादिने ।
ॐ नमः शिवाय शुद्धविद्यतत्वमन्त्ररूपिणे ।
ॐ नमः शिवाय दृक्क्रियाविकस्वरेश्वरात्मने ।
ॐ नमः शिवाय सर्ववित्प्रभो सदाशिवाय ते ।
ॐ नमः शिवाय वाच्यवाचकाध्वषड्भित्तये । ३०
ॐ नमः शिवाय वर्णमन्त्रसत्पदोपपदिने ।
ॐ नमः शिवाय पञ्चधाकलाप्रपञ्चपञ्चिने ।
ॐ नमः शिवाय सौरजैनबौद्धशुद्धिहेतवे ।
ॐ नमः शिवाय भक्तिमात्रलभ्यदर्शनाय ते ।
ॐ नमः शिवाय सर्वतो गरीयसां गरीयसे ।
ॐ नमः शिवाय सर्वतो महीयसां महीयसे ।
ॐ नमः शिवाय सर्वतः स्थवीयसां स्थवीयसे ।
ॐ नमः शिवाय तुभ्यमऽस्त्वऽणीयसामऽणीयसे ।
ॐ नमः शिवाय मन्दराद्रिकन्दराधिशायिने ।
ॐ नमः शिवाय जाह्नवीजलोज्ज्वलाभजूटीने । ४०
ॐ नमः शिवाय बालचन्द्रचन्द्रिकाकिरीटिने ।
ॐ नमः शिवाय सोमसूर्यवह्निमात्रनेत्र ते ।
ॐ नमः शिवाय कालकूटकण्ठपीठसुश्रिये ।
ॐ नमः शिवाय धर्मरूपपुङ्गवध्वजाय ते ।
ॐ नमः शिवाय भस्मधूलिशालिने त्रिशूलिने ।
ॐ नमः शिवाय सर्वलोकपालिने कपालिने ।
ॐ नमः शिवाय सर्वदैत्यमर्दिने कपर्दिने ।
ॐ नमः शिवाय नित्यनम्रनाकिने पिनाकिने ।
ॐ नमः शिवाय नागराजहारिणे विहारिणे ।
ॐ नमः शिवाय शैलजाविलासने सुखासिने । ५०
ॐ नमः शिवाय मन्मथप्रमाथिने पुरप्लुषे ।
ॐ नमः शिवाय कालदेहदाहयुक्तिकारिणे ।
ॐ नमः शिवाय नागकृत्तिवाससेऽप्यऽवाससे ।
ॐ नमः शिवाय भीषणश्मशानभूमिवासिने ।

ॐ नमः शिवाय पीठशक्तिपीठकोपभेदिने ।
ॐ नमः शिवाय सिद्धमन्त्रयोगिने वियोगिने ।
ॐ नमः शिवाय सर्वदिक्कतुर्नयाधिकारिणे ।
ॐ नमः शिवाय सर्वतीर्थतीर्थताविधायिने ।
ॐ नमः शिवाय साङ्गवेदतद्विचारचारवे ।
ॐ नमः शिवाय षड्वादार्थषोडशार्थवादिने । ६०
ॐ नमः शिवाय साङ्ख्ययोगपाञ्चरात्रपञ्चिने ।
ॐ नमः शिवाय भोग्यदायिभोग्यदानतन्त्रिणे ।
ॐ नमः शिवाय पारगाय पारणाय मन्त्रिणे ।
ॐ नमः शिवाय पारपार्थिवस्वरूपरूपिणे ।
ॐ नमः शिवाय सर्वमण्डलाधिपत्यशालिने ।
ॐ नमः शिवाय सर्वशक्तिवासनानिवासिने ।
ॐ नमः शिवाय सर्वतन्त्रवासनारसात्मने ।
ॐ नमः शिवाय सर्वमन्त्रदेवतानियोआगिने ।
ॐ नमः शिवाय स्वस्थिताय नित्यकर्ममायिने ।
ॐ नमः शिवाय कालकल्पकल्पिने सुताल्पने । ७०
ॐ नमः शिवाय भक्तकायसाख्यदाय शम्भवे ।
ॐ नमः शिवाय भूर्भुवःस्वरात्मलक्ष्यलक्षिणे ।
ॐ नमः शिवाय शून्यभावशान्तरूपधारिणे ।
ॐ नमः शिवाय सर्वभावशुद्धशुद्धिहेतवे ।
ॐ नमः शिवाय भास्वते ।
ॐ नमः शिवाय भर्ग ते ।
ॐ नमः शिवाय शर्व ते ।
ॐ नमः शिवाय गर्व ते ।
ॐ नमः शिवाय खर्व ते ।
ॐ नमः शिवाय पर्व ते । ८०
ॐ नमः शिवाय रुद्र ते ।
ॐ नमः शिवाय भीम ते ।
ॐ नमः शिवाय विष्णवे ।
ॐ नमः शिवाय जिष्णवे ।
ॐ नमः शिवाय धन्विने ।
ॐ नमः शिवाय खड्गिने ।

ॐ नमः शिवाय चर्मिणे ।
ॐ नमः शिवाय वर्मिणे ।
ॐ नमः शिवाय भामिने ।
ॐ नमः शिवाय कामिने । ९०
ॐ नमः शिवाय योगिने ।
ॐ नमः शिवाय भोगिने ।
ॐ नमः शिवाय तिष्ठते ।
ॐ नमः शिवाय गच्छते ।
ॐ नमः शिवाय हेतवे ।
ॐ नमः शिवाय सेतवे ।
ॐ नमः शिवाय सर्वतः ।
ॐ नमः शिवाय सर्वशः ।
ॐ नमः शिवाय सर्वथा ।
ॐ नमः शिवाय सर्वदा । १००
शिव भव शर्व रुद्र हर शङ्कर भूतपते
गिरिश गिरीश भर्ग शशिशेखर नीलगल ।
त्रिनयन वामदेव गिरिजाधव माररिपो जय
जय देव देव भगवन् भवतेऽस्तु नमः ॥

एतामष्टोत्तरशतनमस्कारसंस्कारपूतां
भूतार्थव्याहृतिनुतिमुदाहृत्य मृत्युञ्जयस्य ।
कश्चिद्विद्वान्यदिह कुशलं सञ्चिनोति स्म लोके
तेनान्येषां भवतु पठतां वाञ्छितार्थस्यसिद्धिः ॥

इति श्रीव्यासमुनिना विरचितं शिवनिर्वाणस्तोत्रं सम्पूर्णम् ।

Encoded and proofread by Ganesh Kandu kanduganesh at gmail.com, NA

*Shiva Nirvana Stotram*

pdf was typeset on July 20, 2023

Please send corrections to *sanskrit@cheerful.com*